नक्षत्रचक्रस्य मालेव भूषणत्वात्। अरुन्धत्यां, सा हि उत्तरस्यां दिशि गगने सप्तर्षिमण्डलचक्रे वसिष्ठसमीपे-मालारूपेण वर्त्तते सर्व्वेभ्यश्च उज्ज्वलत्वात्तस्या मालारूपेण स्थितत्वाच्च नक्षत्रचक्रभूषणत्वम्।

**अक्षय** त्रि० नास्ति क्षयोऽस्य। क्षयरहिते सर्व्वदा वर्त्तमाने "गयायामक्षयवटे पितॄणां दत्तमक्षयमिति" वायुपुराणम् "अभिजिद्रोहिणीदये यद्दत्तं दीयते जन्तोस्तदक्षयमुदाहृतमिति" स्मृतिः। परमात्मनि पु०। क्षयोवासः, तच्छून्ये अनिकेतने संन्यासिनि, दरिद्रे च। अक्षयं पुण्यमत्रास्ति अच्। अक्षयपुण्यसाधने तिथिभेदे च "अमा वै सोमवारेण रविवारेण सप्तमी। चतुर्थी भौमवारेण अक्षयादपि चाक्षयेति" भविष्यपुराणम्।

**अक्षयतृतीया** स्त्री कर्म्म०। वैशाखशुक्लपक्षतृतीयायाम्। "वैशाखे मासि राजेन्द्र! शुक्लपक्षे तृतीयिका। अक्षया सा तिथिः प्रोक्ता कृत्तिकारोहिणीयुता। तस्यां दानादिकं सर्व्वमक्षयं समुदाहृतमिति"। "या शुक्ला कुरुशार्द्दूल! वैशाखे मासि वै तिथिः। तृतीया साक्षया लोके त्रिदशैरभिवन्दितेति" च भविष्यपुराणम्। "वैशाखस्य सिते पक्षे तृतीयाऽक्षयसंज्ञितेति" स्कान्दपुराणम्।

**अक्षय्य** त्रि० क्षेतुं शक्यं क्षि-यत् नि० न०त०। क्षयानर्हे। अक्षये च "तेषां पिण्डो मया दत्तोह्यक्षय्यमुपतिष्ठतामिति" वायु०

**अक्षय्योदक** न० नक्षय्य मक्षय्य मुदकं यत्र श्राद्धे पिण्डदानानन्तरं देये मधुतिलमिश्रिते उदके। "अक्षय्योदकदानन्तु अर्घ्यदानवदिष्यते। षष्ठ्यैव नित्यं तत् कुर्यात् न चतुर्थ्यां कदाचनेति" छन्दोगप०।

**अक्षर** न० न क्षरतीति क्षर-चलने अच् न०त०। परमब्रह्मणि कूटस्थे चैतन्ये "अक्षरं परमं ब्रह्मेति" गीता। क्रियाशून्ये त्रि० जीवे परमात्मनि च पु०। "क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते इति "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम इति" च गीता। क्षरणशून्ये स्थिरे त्रि०। अश्नुते व्याप्नोति वेदादिशास्त्राणि अश-सरन्। अकारादिवर्णे न० "अक्षराणामकारोऽस्मि द्वन्द्वःसामासिकस्य चेति" गीता। वर्णस्मारकलिपिसन्निवेशे, "अक्षरं वर्णनिर्म्माणं वर्णमप्यक्षरं विदुः। अक्षरं न क्षरं विद्यादश्नोतेर्वा सरेऽक्षरमिति" उज्ज्वल०। उदके मोक्षे च न०।

**अक्षरचण** त्रि० अक्षरेण वर्णविन्यासलिप्या वित्तः अक्षर+चणप्। लेखनाजीवके। [चु(च)ञ्चुप्। लेखनाजीवके।

**अक्षर(चु)चञ्चु** त्रि० अक्षरेण वर्णविन्यासलिप्या वित्तः अक्षर+

**अक्षरच्छन्दस्** न० अक्षरेण वर्णसंख्यया कृतं छन्दः। वर्णवृत्ते "छन्दस्तु द्विविधं प्रोक्तं वृत्तं जातिरिति द्विधा वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेदिति" छन्दोम० तस्य च तत्कृतत्वात्तथात्वम्। अक्षरं निश्चलं छन्दोऽभिप्रायोऽस्य ब०। परमेश्वरे पु० दृढाध्यवसाये त्रि०।

**अक्षरजननी** स्त्री अक्षराणां जननीव। लेखन्याम् (कलम्)।

**अक्षरजीवक** त्रि० अक्षरेण तल्लिपिलेखनेन जीवति जीव-ण्वुल् ३त०। अक्षरलेखनोपजीवके।

**अक्षरतूलिका** स्त्री अक्षराणां तल्लिपिलेखानां तूलिकेव साधनत्वात्। लेखन्याम् (कलम्)।

**अक्षरन्यास** पु० अक्षराणि तत्स्मारकाकारविशेषा न्यस्यन्ते अत्र+नि+अस-आधारे घञ् ६त०। लिप्याम्, पत्रिकायाम्। भावे घञ् ६त०। अक्षरस्मारकरेखाद्याकारविशेषलेखने, हृदयाद्याधारस्पर्शपूर्व्वकं तत्तदक्षराणां स्मरणोच्चारणरूपे तन्त्रप्रसिद्धे वर्णन्यासे, "सविन्दून् वा न्यसेदेतान् निर्विन्दून् वा यथाक्रममिति" तन्त्रम्। विस्तारः मातृकाशब्दार्थे द्रष्टव्यः। अक्षरविन्यासोऽप्युक्तार्थेषु। [पयोऽस्य। लिपिलेखनोपजीविनि।

**अक्षरजीविक** त्रि० अक्षरं तल्लिपिलेखनं जीविका वर्त्तनो-

**अक्षरजीविन्** त्रि० अक्षरेण तल्लिपिलेखनेन जीवति जीव-णिनि ३त०। अक्षरलेखनेन वृत्तिनिर्वाहकारके। स्त्रियां ङीप्।

**अक्षरमुख** त्रि० अक्षराणि तन्मयानि शास्त्राणि वा मुखे यस्य। शास्त्राभिज्ञे अक्षराभिज्ञे च ६त०। अकाररूपे वर्णे न०

**अक्षरशस्** अव्य० अक्षरमक्षरमिति वीप्साय कारके शस्। प्रत्यक्षरमित्यर्थे, "पञ्च अक्षरशः इति" म्टह्यम्।

**अक्षरसंस्थान** न० अक्षराणां तत्स्मारकरेखाविशेषाणां संस्थानमत्र ब०। वर्णस्मारक-रेखाविशेषयुक्त-लिप्याम्। "लिखिताक्षरसंस्थानमित्यमरः"।

**अक्षराङ्ग** न० अक्षराणामङ्गं तत्स्मारकरेखाविशेषाणामवयवः ६त०। लिप्याम्, लेखनसाधनद्रव्ये च।

**अक्षराज** पु० अक्षेण तत्क्रीडया राजेव। द्यूतासक्ते।

**अक्षरी** स्त्री अश्नुते गगनाभोगं मेघैः अश-सरन् गौ० ङीष्। वर्षायाम्

**अक्षवती** स्त्री अक्षा पाशकाः साधनत्वेन विद्यन्तेऽत्र अक्ष+मतुप् मस्य वः ङीप्। द्यूतक्रीड़ायाम्।

**अक्षवाट** पु० अक्षाणां पाशकक्रीडानां वाटः वासस्थानम्।